# S-I/1/22SNYS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-1)**

**न्यायः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. पदार्थाः कति? कानि च तेषां नामानि?
2. द्रव्यादयः पदार्थाः कुत्र प्रसिद्धाः?
3. सादृश्यमव्यतिरिक्तः पदार्थ इति के वदन्ति?
4. सादृश्यस्य लक्षणं किम्?
5. ज्ञेयत्वादिकं केषां साधर्म्यम्?
6. अनेकत्वं समवायित्वञ्च साधर्म्यं केषाम्?
7. समवायित्वं नाम किम्?
8. कारणस्य लक्षणं किम्?
9. ज्ञेयत्वं कस्यापि वैधर्म्यं कुतो न?
10. पृथिव्याः लक्षणं किम्?
11. नवीनमते मङ्गलस्य फलं किम्?
12. ईश्वरसाधकानुमानं लिखत।
13. अवयवावयविनोः सम्बन्धः कः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वं प्रतिपाद्य तन्निरस्यताम्।
15. ग्रन्थोक्तदिशा पृथिव्यप्तेजोवायुमनसां साधर्म्यं किमिति विचारयत।

16. शरीरत्वं जातिरस्ति न वेति प्रतिपादयत।

17. यथाग्रन्थं घ्राणेन्द्रियत्वं विचारयत।

18. ग्रन्थारम्भे मङ्गलस्य प्रयोजनं किमिति प्रतिपादयत।

19. भेदपुरस्सरं वायोः स्वरूपमुपपादयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. स्वाधीतग्रन्थदिशा पदार्थानां स्वरूपं प्रतिपादयत।

21. समवायसद्भावे प्रमाणं प्रदर्श्य समवायलक्षणं विमृशत।

22. सप्रकारं कारणत्वं विवृणुत।

# S-I/2/22SNYS1CCTC2/23

**प्रथमसत्रार्द्धः**

**द्वितीयपत्रम् (DSCC-2)**

**न्यायः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अनुभूतिः कतिविधा?
2. न्यायमते प्रमाणं कतिविधम्?
3. प्रत्यक्षप्रमायाः लक्षणं किम्?
4. ज्ञानाकरणकं ज्ञानमिति लक्षणं कस्य?
5. प्रत्यक्षं कतिविधम्?
6. घ्राणस्य गोचरः कः?
7. त्वचो गोचरः कः?
8. त्वङ्मनस्संयोगः कारणं कुत्र?
9. मनोग्राह्यमित्यस्य कोऽर्थः?
10. लौकिकालौकिकभेदेन द्वैविध्यं कस्य?
11. लौकिकप्रत्यक्षे सन्निकर्षाः कति?
12. सामान्यलक्षणसन्निकर्षः कस्य प्रकारः?
13. योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्यः कः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्वाधीतग्रन्थदिशा प्रत्यक्षस्य स्वरूपं प्रतिपादयत।
15. सोदाहरणं प्रत्यक्षस्य षड्विधत्वं विचारयत।

16. त्वङ्मनस्संयोगस्य ज्ञानसामान्यं प्रति कारणत्वं कथमस्तीति प्रदर्शयत।
17. सोदाहरणं महत्त्वस्य षड्विधप्रत्यक्षे कारणत्वं प्रतिपादयत।
18. लौकिकसन्निकर्षस्य षड्विधत्वं सोदाहरणं प्रतिपादयत।
19. स्वाधीतग्रन्थदिशा अलौकिकसन्निकर्षस्य त्रैविध्यं प्रतिपादयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. स्वाधीतग्रन्थदिशा निर्विकल्पकत्वं विचारयत।
21. सपदकृत्यमिन्द्रियलक्षणं परिष्कुरुत।
22. जन्यप्रत्यक्षलक्षणपरित्यागे बीजमुपपादयत।

# S-I/3/22SNYS1EDTC3D/23

## प्रथमसत्रार्द्धः

## तृतीयपत्रम् (DSE-1)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. पदार्थाः कति ?
2. षण्णां पदार्थानां भावत्वं कथम् ?
3. नैयायिकानामपि अविरुद्धाः के ?
4. उपमानचिन्तामणौ सप्तपदार्थभिन्नतया किमाशङ्कितम् ?
5. क्षितिः नाम का ?
6. कानि नवद्रव्याणि ?
7. द्रव्यत्वजातौ प्रमाणं किम् ?
8. तमसो अतिरिक्तद्रव्यत्वे को दोषः ?
9. सामान्यं कतिविधम् ?
10. अन्त्यो नित्यद्रव्यवृत्तिः कः ?
11. परमाणूनां परस्परभेदसाधकः कः ?
12. नित्यद्रव्यविशेषयोश्च सम्बन्धः कः ?
13. संसर्गाभावः कतिविधः ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्राचीनानां मते मङ्गलस्य फलं किमिति विचारयत।
15. स्वाधीतग्रन्थदिशा ईश्वरस्य सिद्धिः कथं भवतीति विचारयत।

16. शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वं प्रतिपाद्य तन्निरस्यताम्।

17. सप्तपदार्थानां साधर्म्यं किमिति प्रतिपादयत।

18. कारणत्वं साधर्म्यं केषां भवतीति उदाहरणपूर्वकमुपस्थापयत।

19. स्वाधीतग्रन्थदिशा अभावपदार्थस्य स्वरूपं प्रतिपादयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. पृथिव्याः लक्षणं प्रकारान् च प्रतिपादयत।

21. द्रव्यत्वजातिसिद्धिः कथं भवतीति प्रदर्शयत।

22. अवयवातिरिक्तावयवी अस्ति न वेति विचारयत।

# S-I/4/22SNYS1EGTC4D/23

**प्रथमसत्रार्द्धः**

**चतुर्थपत्रम् (GE-1)**

**न्यायः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. रूपस्य लक्षणं किम्?
2. गुणाः कति? के च ते?
3. भास्वरशुक्लं कस्य रूपं वर्तते?
4. स्पर्शलक्षणे गुणपदं किमर्थम्?
5. तेजस्संयोगः कः?
6. कारणस्य लक्षणं किम्?
7. कारणलक्षणे अनियतरासभादिवारणाय किं निवेशितम्?
8. अनन्यथासिद्धत्वं किम्?
9. अन्यथासिद्धः कतिविधः?
10. कार्यस्य लक्षणं किम्?
11. समवायिकारणस्य लक्षणं किम्?
12. पदार्थाः कति?
13. न्यायमते प्रमाणं कतिविधम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. रूपादिचतुष्टयं पृथिव्यां पाकजं कथं भवतीति विचारयत।
15. स्वाधीतग्रन्थदिशा सप्रकारं गुणस्वरूपं प्रतिपादयत।

16. कारणसामान्यलक्षणं विलिख्य समन्वयो विधेयः।

17. सोदाहरणपूर्वकमसमवायिकारणलक्षणं परिष्कुरुत।

18. धर्मविशेषाणामवच्छेदकत्वं प्रतिपादयत।

19. सम्बन्धविशेषाणामवच्छेदकत्वं कथं भवतीति प्रतिपादयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. स्वाधीतग्रन्थदिशा बुद्धेः स्वरूपं प्रतिपादयत।

21. यथार्थानुभवस्य चातुर्विध्यं प्रदर्शयत।

22. कारणत्वं परिष्कुरुत।